Roll No. ........................ Total No. of Pages : 2

Total No. of Questions : 8

# पूर्वमध्यमा द्वितीयखण्ड

## विषय कोड : 614

## साहित्यम्

## चतुर्थं प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

---

1. वस्तुनिष्ठप्रश्ना: – 10×2=20

(क) रघुवंशमहाकाव्यस्य रचयिता क: ?

(ख) सुदक्षिणा कस्य पत्नी आसीत् ?

(ग) रघुवंशम् काव्यम् कीदृशं काव्यम् ?

(घ) महाकवि: कालिदासस्य प्रिय: अलङ्कार: क: ?

(ङ) रघुवंशमहाकाव्यस्य द्वितीये सर्गे कति श्लोका: सन्ति: ?

(च) चन्द्रालोकस्य रचयिता क: ?

(छ) चन्द्रालोके कति मयूखा: सन्ति: ?

(ज) षष्ठे मयूखे के विषया: निरूपिता: सन्ति ?

(झ) नवमे मयूखे का वृत्ति: निरूपिताऽस्ति ?

(ञ) चन्द्रालोकस्य का व्युत्पत्ति: अस्ति ?

2. रिक्तस्थानम् पूरयत – 5×2=10

(क) पर्यस्तापह्नुतिर्यत्र ............................ निषिध्यते।

(ख) अलङ्कार: परिकर: ............................ विशेषणे।

(ग) प्रस्तुताप्रस्तुतानां च ............................ दीपकं मतम्।

(घ) तस्या: खुरन्यासपवित्रपांसुमपांसुलानां ............................।

(ङ) एकातपत्रं जगत: प्रभुत्वं नवं वय: ............................ वपुश्च।



315

3. अधोलिखितेषु कयोः **द्वयोः** श्लोकयोः संस्कृतेन व्याख्या लेख्या– 2×10=20

(क) व्रताय तेनानुचरेण धेनोर्न्यषेधिशेषोऽप्यनुयायिवर्गः।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः॥

(ख) अन्येद्युरात्मानुचरस्य भावं जिज्ञासमानां मुनिहोमधेनुः।
गङ्गाप्रघातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश॥

(ग) क्षतात्किलत्रायत इत्युदग्रक्षत्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीत वृत्तेः प्राणैरूपक्रोशमलीमसर्वा॥

4. अधोलिखितेषु **द्वयोः** अलंकारयोः सोदाहरणं निरूपणं कुरुत– 2×5=10

(क) उपमा

(ख) रूपकम्

(ग) काव्यलिङ्गम्

5. शुद्धाशुद्धवाक्यानां समक्षे विचिन्त्य आम्/न लिखत– 5×2=10

(क) रघुवंश महाकाव्यम् अस्ति।

(ख) चन्द्रालोके सर्गाः सन्ति।

(ग) चन्द्रालोके दश मयूखा सन्ति।

(घ) दिलीपेन व्याघ्रस्य सेवा कृता।

(ङ) दिलीपस्य पत्नी सुदक्षिणा नाऽस्ति।

6. विप्रलम्भशृङ्गार सोदाहरणं वर्णनीयः। 1×10=10

**अथवा**

वीररसः भेदप्रदर्शनपूर्वकं सोदाहरणं लेखनीयः।

7. 'उपमा कालिदासस्येति' सूक्तिः सम्यग् समालोचनीया। 1×10=10

**अथवा**

रघुवंशमहाकाव्यस्य द्वितीय सर्गीया कथा सङ्क्षेपेण लेख्या।

8. लाटीया रीतिः यथाग्रन्थं सोदाहरणं लेखनीया। 1×10=10

**अथवा**

मधुरावृत्तिः सोदाहरणं लेखनीया।



815

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र. – 01

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्यम् विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न ~~01~~ 08

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०1 | | |
| उ०क⇒ | कालिदासः। | |
| उ०ख⇒ | दिलीपः। | |
| उ०ग⇒ | महाकाव्यम्। | |
| उ०घ⇒ | उपमा। | |
| उ०ङ⇒ | पंचसप्ततिः। | |
| उ०च⇒ | पीयूषवर्षी श्रीजयदेवः। | |
| उ०छ⇒ | चन्द्रलोके दश मयूखाः सन्ति। | |
| उ०ज⇒ | षष्ठे मयूखे रसाः भावा रीतयश्च वर्णिताः सन्ति। | |
| उ०झ⇒ | लक्षणावृत्तिः नवमे मयूखे निरूपिताऽस्ति। | |
| उ०ञ⇒ | चन्द्रमसः आलोकः इव अलोको काव्योपयोगिनां विषयाणां प्रकाशः यस्मिन्निति चन्द्रालोकः। | |

हस्ताक्षर

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र. - 02

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्य म विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय - 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ० 2 → | | |
| क → | धर्ममात्रम्। | |
| ख → | साभिप्राये, | |
| ग → | तुल्यत्वे, | |
| घ → | धुरि कीर्तनीया, | |
| ङ | कान्तमिदम् | |

हस्ताक्षर

प्राश्निक कोड क्र. 91914

पृष्ठ क्र.- 03

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

प्रश्न पत्र/आदर्श उत्तर

विषय साहित्य ............ विषय कोड 614 ............ माध्यम संस्कृत

कुल प्रश्न 01

समय - 3 घण्टा

निर्देश

पूर्णांक 100

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०⇒ उ | सन्दर्भ :- प्रस्तुतमिदं पद्यं महाकविकालिदासप्रणीतं रघुवंशमिति महाकाव्यस्य द्वितीयसर्गादुद्धृतमस्ति ।<br><br>अन्वय :- व्रताय धेनोः अनुचरेण तेन शेषः अपि अनुयायिवर्गः न्यषेधि तस्य शरीररक्षा च अन्यतः न हि मनोः प्रसूतिः स्ववीर्यगुप्ता "भवति" ।<br><br>व्याख्या :- व्रताय = सन्तानलाभनियमाय, धेनोः = गोः नन्दिन्या, अनुचरेण = सेवकेन, तेन = दिलीपेन, शेषः = अवशिष्टः, अपि = तु, अनुयायिवर्गः = अनुचरसमूहः, न्यषेधि = निवर्तितः, तस्य = दिलीपस्य, शरीररक्षा = देहसंरक्षणम्, च = अपि, अन्यतः = अपरसेवकादितः, न = नहि भवति, हि = यतो हि, मनोः = वैवस्वतनामक-मनुकुलस्य, प्रसूतिः = सन्ततिः, स्ववीर्यगुप्ता = निज-पुरुषार्थरक्षिता, "भवति" ॥ | |
| उत्तर⇒ | सन्दर्भ ⇒ प्रस्तुतमिदं पद्यं महाकविकालिदासविरचितं रघुवंशमिति महाकाव्यस्य द्वितीयसर्गादुद्धृतमस्ति ।<br><br>अन्वय = अन्येद्युः आत्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोः गह्वरम् आविवेश । | |

हस्ताक्षर

318

प्राश्निक कोड क्र. 2/1314

पृष्ठ क्र. - 04

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | व्याख्या ⇒ अन्येद्युः = अपरेऽस्मिन् दिवसे, आत्मानुचरस्य = स्वसेवकस्य दिलीपस्य, भावं = मनोगतभावं, जिज्ञासमाना = परिज्ञातुमभिलषन्ती, सती मुनिहोमधेनुः = ऋषिहवनसाधनभूता नन्दिनी, गङ्गाप्रपातान्तविरूढशष्पं = जाह्नवीप्रवाहतटाङ्कुरितं तृणं, गौरीगुरोः = पार्वतीपितुः हिमालयस्य, गह्वरम् = गुहाम्, आविवेश = प्रवेशं चकार। | |
| ग ⇒ | सन्दर्भः – प्रस्तुतमिदं पद्यं महाकविकालिदासविरचित रघुवंशमहाकाव्यस्य द्वितीयसर्गादुद्धृतमस्ति। | |
| | अन्वयः ⇒ उदग्रः क्षत्रस्य शब्दः क्षतात् त्रायते इति भुवनेषु रूढः किल, तद्विपरीतवृत्तेः राज्येन किम्? उपक्रोशमलीमसैः प्राणैः वा किम्। | |
| | व्याख्या – उदग्रः = सर्वोन्नत, क्षत्रस्य = क्षत्रियस्य, शब्दः = वाचकः, क्षतात् = विनाशात्, त्रायते = रक्षति, इति = इत्थं, भुवनेषु = जगति, रूढः = ख्यातः, किल = निश्चयेन, तद्विपरीतवृत्तेः = क्षत्रपदार्थविरुद्धव्यवहारस्य पुरुषस्य, राज्येन = साम्राज्येन, किम् = न किमपि प्रयोजनम्, उपक्रोशमलीमसैः = लोकापवाददूषितैः, प्राणैः = जीवनैः, वा = अथवा, किम् = निष्फलमेव, न किमपि फलम्॥ | |

हस्ताक्षर

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र. - 05

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

प्रश्न पत्र/आदर्श उत्तर

विषय: साहित्य ........ विषय कोड 614 ........ माध्यम संस्कृत

कुल प्रश्न 01

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| उ०4(क) | सर्वेषाम् अर्थालङ्काराणां प्रायः उपमैकपर्यवसायित्वादर्थालङ्कारजननी-मुपमां सर्वादौ लक्षयति पीयूषवर्षी श्रीजयदेवः — | |
| | श्लोक ÷ उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः । हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव ॥ | |
| | यत्र द्वयोः सादृश्यलक्ष्मीः हृदये खेलतोः उच्चैः तन्वङ्गीस्तनयोः इव उल्लसति सा उपमा, यत्र = यस्मिन् अलङ्कारे, द्वयोः = उपमानोपमेययोः, सादृश्यलक्ष्मीः = सादृश्यश्री, हृदये = वक्षःस्थले, खेलतोः = क्रीडतोः, उच्चैः = उन्नतयोः, तन्वङ्ग्याः = कोमलाङ्ग्याः कृशाङ्ग्याः, स्तनयोः = कुचयोः इव = यथा, उल्लसति = राजते, सा उपमा = उपमानामालङ्कारः। कृशाङ्ग्याः सुन्दर्याः नायिकायाः वक्षःस्थले समुच्छ्वलतोः उन्नतयोः कुचयोः इव यत्र उपमानोपमेययोः द्वयोः सादृश्य-लक्ष्मीः शोभा उल्लसति तत्र उपमा अलङ्कारः भवति ॥ | |
| (ख) | रूपकालङ्कारं लक्षयन्नाह ग्रन्थकारः — | |
| | श्लोक ÷ यत्रोपमानचित्रेण सर्वथाप्युपरज्यते । उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥ | |
| | यत्र उपमानचित्रेण उपमेयमयी भित्तिः सर्वथा उपरज्यते तत्र रूपकम् इष्यते । | |

हस्ताक्षर

प्राश्निक कोड क्र. 21914

पृष्ठ क्र.- 06

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय: साहित्य विषय कोड: 614 माध्यम: संस्कृत

कुल प्रश्न: 01

समय - 3 घण्टा पूर्णांक: 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | यत्र=यस्मिन् स्थले, उपमानचित्रेण=अवर्ण्यालेख्येन उपमेयमयीभित्तिः=वर्ण्यमानरूपं कुड्यम्, सर्वथा=सर्वविधेन उपरज्यते=उपरक्ता भवति, तत्र=तस्मिन् स्थले रूपकम् अलङ्कारः। यत्र ~~उपमेयमयी~~ उपमानोपमेययोः अभेदारोपः तत्र रूपकम् अलङ्कारः भवतीति तात्पर्यार्थः। उदाहरति- उपमानमेवचित्रमिति मयूरव्यंसकादयश्चेति समासेन समस्ताभेदरूपकोदाहरणे उपमान चित्रतादात्म्यस्य उपमेयमय्येव भित्तिरिति स्वार्थमयता असमस्ताभेदरूपकोदाहरणे उपमेये भित्तितादात्म्यस्य चारोपात् लक्षणसंगतिः। इत्थम् यत्र उपमानोपमेययोः भेदः न प्रतीयते तत्रेदम्। चन्द्रालोके अस्य सोपाधि रूपकम्, साद्दृश्य रूपकम्, आभासरूपकम्, रूपित रूपकम् चेति चत्वारो भेदाः अभिमताः। उदाहरणान्तरं यथा- 'मुखं चन्द्रः' । अत्र उपमेये मुखे उपमानस्य चन्द्रस्य आरोपः, अतोऽत्र रूपकालङ्कारः॥ | |
| ग→ | यत्र नवीनार्थबोधकः पदार्थः वाक्यार्थो वा भवति तत्र काव्यलिङ्गालङ्कारः भवति, यथा ब्रूते ग्रन्थकारः- | |
| | श्लोकः- स्यात् काव्यलिङ्गं वागर्थो नूतनार्थसमर्पकः। जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः॥ | |
| | यत्र नूतनार्थसमर्पकः वागर्थः तत्र काव्यलिङ्गं स्यात्, हे मन्दकन्दर्प, यतः मच्चित्ते त्रिलोचन अस्ति, अतः त्वम् जितोऽसि॥ | |

हस्ताक्षर

321

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र.- 07

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय प्रश्न पत्र/आदर्श उत्तर

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय – 3 घण्टा पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | यत्र = यस्मिन् स्थले, नूतनार्थसमर्पकः = अभिनवार्थबोधकः वाक्यार्थः = वाक्यार्थपदार्थान्यतररूपः वाच्य एव वाच्यार्थः पदार्थो वा स्यात् = भवेत्, तत्र = तस्मिन् स्थले, काव्यलिङ्गम् = काव्यलिङ्गनामालङ्कारः भवति, उदाहरणं यथा हे मन्दकन्दर्प! = हे मूढकामदेव! यत् = यस्मात् कारणात्, मच्चित्ते = मेमनसि, त्रिलोचनः = त्रिनयनः हरः वर्तते, अतः त्वम् जितोऽसि = विजितोऽसि, अत्र मच्चित्ते त्रिलोचनोऽस्ति इति वाक्यार्थेन कामदाहकरुद्रवृत्तीय-नेत्र रूप वाक्यार्थप्रतीतिः जायते। अतएव वाक्यार्थ-हेतुकः काव्यलिङ्गालङ्कारः ॥ | |
| उ० ⇒ 5 | | |
| क ⇒ | आम। | |
| ख ⇒ | न। | |
| ग ⇒ | आम। | |
| घ ⇒ | न। | |
| ङ ⇒ | न। | |

हस्ताक्षर

प्राश्निक कोड क्र. 21314

पृष्ठ क्र. - 08
प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय - 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|

उ०-(क) अभिलाषोऽप्राप्तसमागमयोः परस्परप्राप्तीच्छा, विरहोऽनुरागाद् दैवप्रतिबन्धाद् लज्जादिवशाच्चासंयोगः विप्रलंभः।
उदाहरणं यथा -

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥

अत्र मालती आलम्बनम्, तद्विलासानुस्मरणमुद्दीपनम्, आसंशाऽनुभावः, तद्धौत्कण्ठाव्यभिचारिभावः॥

॥ अथवा ॥

उ०- वीररसस्य स्थायीभावः उत्साहः, नायक आलम्बन विभावः प्रभावादि उद्दीपन विभावः स्थैर्यादि अनुभावाः ~~तत्कृतद्रोणा-~~ ~~ह्न्यादयः~~ धृति - मति - स्मृति - गर्व - तर्क - रोमाञ्चादिः व्यभिचारिभावः अयं रसः महेन्द्र देवतः हेमवर्णश्च भवति यथा लक्षयति ग्रन्थकारः -

उत्साहाख्यस्थायिभावः प्रभावादिविभावभूः।
वीरोऽनुभावैः स्थैर्याद्यैर्भावैर्गर्वादिभिर्युतः॥

वीररसोऽयं चतुर्धा भवति दानवीर - धर्मवीर - युद्धवीर - दयावीरभेदाच्च, तत्र युद्धवीरः श्रीरामचन्द्रः -

हस्ताक्षर

३२३

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र.- 09

परीक्षा का नाम - पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

प्रश्न पत्र/आदर्श उत्तर

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय - 3 घण्टे

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | श्लोक:- भो लङ्केश्वर ! दीयतां जनकजा, रामः स्वयं याचते, कोऽयं ते मति विभ्रमः ? स्मर नयम्, नाद्यापि किञ्चिद्गतम्। नैव चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः॥ | |
| | अत्रोत्साहः स्थायीभावः, रावण आलम्बनविभावः, रावणकृतसीताहरणमुद्दीपनविभावः, रामस्य शौर्यपूर्णोक्तिरनुभावः, गर्वादयो व्यभिचारिभावाः, एषां संयोगेन सामाजिकेषु युद्धवीरस्य रसस्यास्वादनं भवति। | |
| उ०7 | कविकुलगुरुकालिदासविषये यद्यपि बुधैः मुक्तकण्ठेन प्रकामप्रशंसितवाक्यानि सन्ति किन्तु 'उपमा कालिदासस्य' ति सूक्तिरियं सार्थवती बहुचर्चितविषया चास्ति। वस्तुतः कालिदासस्य काव्येषु नर्तकीव पदे-पदे नृत्यन्ती उपमा सर्वेषां पाठकानां श्रोतृणाञ्च मनो हरत्येव, एतादृशं सौन्दर्यं कुत्रापि न दर्शनीयम्। अतोऽत्रोपमायाः विषये कविगतप्रतिभाप्रकाशनं सर्वथैव समीचीनं प्रतिभाति मे। | |
| 1. | उपमायाः स्वरूपम् - अलङ्कारशास्त्रप्रणेतृभिः विविधरीत्या उपमायाः लक्षणं प्रतिपादितं वर्तते। किन्तु अत्र काव्यप्रकाशकारेण मम्मटाचार्येण 'साधर्म्यमुपमा भेदे' इति सङ्क्षिप्तं लक्षणमुक्तमस्ति। अत्रोपमानोपमेययोः सादृश्यमेव प्रधानम्। यत्रोपमानोपमेयसाधारणधर्म | |

हस्ताक्षर

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र.- 10

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

प्रश्न पत्र/आदर्श उत्तर

विषय........ साहित्य ........ विषय कोड........ 614

कुल प्रश्न........ 01 ........ माध्यम........ संस्कृत

समय – 3 घण्टा

निर्देश

पूर्णांक 100

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | इवादि-चतुष्क वाचकशब्दाः विलसन्ति, तत्र पूर्णोपमा, यत्र च तेषामेकस्याप्यभावं भवति तत्र लुप्तोपमेति भेदद्वयं मुख्यतया प्रतिपादितमस्ति, महाकवेः कृतिषु सर्वविधोपमायाः स्वाभाविकप्रयोगं दृश्यते। | |
| 2. | उपमायाः विषयविचारः— महाकविः कथावर्णनप्रसङ्गे त्रैलोक्यविषयप्रतिपादने उपमाऽलङ्कारमाध्यमेन सक्षमः प्रतिभाति, अत्र रघुवंशमहाकाव्यस्यैवोपमायाः दिङ्मात्रमुदाहरणानि विभिन्नदृष्टिभिः प्रदीयन्ते — | |
| | शब्दार्थगतोपमा – 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये, जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ'। | |
| | शास्त्रगतोपमा — 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत'॥ | |
| | सन्ध्यागतोपमा – 'पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या, तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या'॥ अथवा — विभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम्' | |
| | विद्याभ्यासगतोपमा – 'वन्यवृत्तिरिमां शश्वदात्मानुगमनेन नवम्'। विद्यामभ्यसनेनेव प्रसादयितुमर्हसि॥ | |
| | प्रभातनिशागतोपमा – तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी'। | |
| | चन्द्रवृद्धिगतोपमा – पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः॥ | |

हस्ताक्षर

325

प्राश्निक कोड क्र. 8/1914

पृष्ठ क्र.- 11
प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय ... साहित्य ... विषय कोड ... 614 ... माध्यम ... संस्कृत

कुल प्रश्न ... 01

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | यज्ञदक्षिणागतोपमा — पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥ | |
| | इत्थं विविधविषयप्रयोगकृतोपमायाः लोकातिशयं सौन्दर्यं महाकविकालिदासस्यालौकिकी प्रतिभैव नैसर्गिकी जायते ॥ | |
| | अथवा | |
| उ० 7 | महाकविकालिदासविरचितं रघुवंशमिति महाकाव्यस्य द्वितीयसर्गस्य सङ्क्षिप्तं कथावस्तु इत्थं वर्णितमस्ति। | |
| 1. | वनगमनोसेवाप्रकारम् :- सभार्यः राजा दिलीपो वशिष्ठस्याश्रमे निशानयनान्तरं प्रातःकाले दुग्धपानान्तरं वत्सं बद्ध्वा सुदक्षिणया सम्पूजितां गुरोर्धेनुं नन्दिनीं वनगमनाय बन्धनात् मुमोच। किञ्चिद्दूरातिक्रान्तानन्तरं अनुसृतवलीं प्रियामनुयायिवर्गाञ्च निवर्त्य गोगात्रखर्जनेन, वनमक्षिका-निवारणेन स्वच्छन्दभ्रमणेन च राजा धेनोः सेवायां संलग्नोभूत्। स च धेनोर्गमने-उपवेशने जलादाने स्थितौ च छायामिवानुसरणं कृतवान् एवं तत्र सः वन्यजीववनस्पतिभिः विहितस्वागत विशेषं स्वीकुर्वन् सन्ध्यासमये नन्दिन्याः सुदक्षिणा ~~सह गोसेवानियमं~~ कृतस्वागतानन्तरमेवाश्रमे प्रविशति स्म ॥ | |
| 2. | सन्ध्याकालीनगोसेवाप्रकारम् — राजा दिलीपो वनान्निवर्त्य सभार्यस्व गुरोः चरणावभिवाद्य सायङ्कालिकञ्च सन्ध्योपासनादिनित्यकर्म समाप्य दुग्धदोहनानन्तरं समासीनां नन्दिनीं भूयोऽपि सेवयामास। इत्थं सुदक्षिणया सह गोसेवा नियमं समाचरतो दिलीपस्य एकविंशति दिनानि व्यतीतानि ॥ | |

हस्ताक्षर

326

प्राश्निक कोड क्र. 81914

पृष्ठ क्र.- 12

प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :- पूर्वमध्यमा / उत्तरमध्यमा, खण्ड-प्रथम / द्वितीय

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय - 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| 3. | सिंहाक्रमणवर्णनम् – द्वाविंशे दिवसे स्वसेवकस्य सेवाभावं जिज्ञासमाना नन्दिनी हिमालयस्य समृद्धतृणाङ्कुरां गुहां प्रविवेश अथ च पर्वतस्य सौन्दर्यं दर्शने दत्तदृष्टिना दिलीपेनादृष्टरेखो मायामयः सिंहो तां हठादाक्रान्तवान्। तदनंतरं गुहाव्याप्तप्रतिध्वनिदीर्घं तदीयमाक्रन्दितं श्रुत्वा स धेनोः पुरोवर्तमानं सिंहं ददर्श, राजाऽपि यदा तं हन्तुं तूणीरात् बाणं निष्कासयितुमैच्छत् तदा बाणमूले सक्ताङ्गुलिः सः चित्रलिखित इव कुण्ठितोऽभूत ॥ | |
| 4. | सिंहदिलीपसंवाद – किंकर्त्तव्यविमूढं दिलीपमवेक्ष्य सिंह उवाच – हे राजन्! मां वधाय व्यर्थप्रयासं मा कुरु, अहं शिववाहनवृषभस्य निकुम्भनायकस्य सुहृदोऽस्मि। एकदा शंकरपुत्रवत् पार्वत्या कनकघटजलसंवर्धितं पुरो दृश्यमानमिदं देवदारुं वन्यगजः विदारितवान्। तदर्थं शोकनिमग्नां गिरिजां विलोक्य शिवः रक्षार्थमस्यात्र मां नियुक्तवान्, तदाप्रभृत्येवात्रागतान् सत्त्वान् खादित्वाहं निवसामि, अतः लज्जां विहाय त्वं निवर्तस्व। सिंहस्य साभिप्रायपूर्णं वचशं निशम्य राजा प्रत्युवाच – हे मृगेन्द्र! यद्यपि मे महेश्वरः वन्दनीयः किन्तु गुरोः धेनुरपि मे-पेक्षणीया, अतो धेनुरिमां विमुच्य मदीयेन शरीरेणैव त्वं स्वोदरं पूरय, दिलीपस्येदं वाक्यं श्रुत्वा ईषदस्मितः सिंहो जगाद – हे राजन्! सर्वसौख्यगुणसमृद्धः प्रजापालकः चक्रवर्ती नृपो भवान्, एकस्याः धेनोः कारणात् स्वजीवनार्पणं कार्यं तव नोचितं मे | |

हस्ताक्षर

प्राश्निक कोड क्र. 2/1914

पृष्ठ क्र. – 13

परीक्षा का नाम – पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

प्रश्न पत्र/आदर्श उत्तर

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | प्रतिभाति । वचनमिदं सिंहस्य श्रुत्वा राजा पुनरप्युवाच हे सिंह! क्षत्रियोऽहम्, अतः धेनुरियं स्वदेहविनिमयेनापि मया भवतो मोचयितुं न्याय्येत्युक्त्वा निज देहं सिंहाय कवलमिव समर्पितवान् ॥ | |
| 5. | नन्दिनीवरप्रदानम् – दिलीपेन स्वदेहार्पणानंतरं नन्दिनी उवाच – हे वत्स! उत्तिष्ठ, गुरौ तव भक्त्याऽहं प्रसन्नाऽस्मि वरं वृणीष्व । उन्नतमुखः भूत्वा सिंहमनवलोक्य सुदक्षिणायां तनयं ययाचे । अथ चाश्रमे निवर्त्य सर्ववृत्तं गुरवे निवेदितवान् । गुरुवशिष्ठोऽपि स्वस्तिवाचनं कृत्वा सुदक्षिणा दिलीपौ राजधानीमयोध्यां प्रति प्रस्थापयामास ॥ | |
| उ०–४ | पञ्चषट्सप्तमपदानां समासे लाटीया रीतिः भवति । कश्चिदस्याः लक्षणं अन्या रीत्या कथयति – मृदुपसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा । उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥ लाटीरीतेरुदाहरणमिदमस्ति – अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनाली-बालमन्दारपुष्पम्, विरहविधुरकोकद्वन्दबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥ अत्र भञ्जनमन्दारद्वन्दबन्धुभिन्दन्निति पदेषु माधुर्यव्यञ्जकवर्णानां सद्भावाद् वेदर्भीघटकत्वमपरवर्णानां पाञ्चाली घटकत्वमत उभयमिश्रणाल्लाटी रीतिः सिद्ध्यति । | |

हस्ताक्षर

प्राश्निक कोड क्र. 91914



प्रश्न पत्र/आदर्श उत्तर

परीक्षा का नाम :– पूर्वमध्यमा / उत्तरमध्यमा, खण्ड–प्रथम / द्वितीय

विषय साहित्य विषय कोड 614 माध्यम संस्कृत

कुल प्रश्न 01

समय – 3 घण्टा

पूर्णांक 100

निर्देश

| प्रश्न क्रमांक | | प्रश्न के लिए अधिकतम अंक |
|---|---|---|
| | ॥ अथवा ॥ | |
| प्र॰ ४ | यस्यां कवितायां स्वीयैः वर्गस्थैः पञ्चमवर्णैः ङकारादिभिः ङ – ञ – ण – न – म – रूपैः संयुक्ताः कवर्गादिस्थिताः चत्वारो वर्णाः क – ख – ग – घादयः भवन्ति तत्र मधुरावृत्तिः भवति, तथा च सा वृत्तिः लकारेण सहित लकारश्च भवति एवं रेफणकारौ ह्रस्वेनाक्षरेण अन्तरितौ भवतः सा एव वृत्तिः मधुरा ख्याता। यथा लक्षयति ग्रन्थकारः — | |
| | मधुरायां समाक्रान्तां वर्गस्था पञ्चमैर्निजैः। लकारश्च लसंयुक्तो ह्रस्वव्यवहितौ रणौ ॥ | |
| | निजैः पञ्चमैः वर्णैः समाक्रान्ताः वर्गस्थाः मधुरायां भवन्ति तथा रणौ ह्रस्वव्यवहितौ लकारश्च लसंयुक्तो भवति, अस्योदाहरणं यथा — | |
| | अङ्गभङ्गोल्लसल्लीला तरुणीस्मरतोरणम् तकककशपूर्णोक्ति – प्राप्तोत्कण्ठधियां वृथा ॥ | |

हस्ताक्षर

329